# याज्ञवल्क्यस्मृतिमितोक्षरोक्तदिशा साधारणव्यवहारप्रविधिप्रक्रियाविमर्शः
# (An Analysis of General Legal Procedure in the Yājñavalkya & Mitakshara Tradition)

**Dr.R.Naveen**
**Associate Professor**
**Department of Sanskrit & Indian Culture, SCSVMV University, Enathur**
**Kanchipuram,Tamilnadu**
**India**

**Abstract:** The *Yājñavalkya Smṛti* outlines a structured legal system within its *Vyavahāra Adhyāya*, detailing ancient Indian civil and procedural law. This study examines key aspects such as types of disputes, pleadings, injunctions (*āsedha*), and the fourfold process—*bhāṣā*, *uttara*, *kriyā*, and *phala*. It reflects on the rational and organized nature of legal practice envisioned by ancient jurists and its continued relevance to modern legal thought.

**Keywords:** याज्ञवल्क्यस्मृति (Yājñavalkya Smṛti) व्यवहाराध्यायः (Vyavahāra Adhyāya) धर्मशास्त्रम् (Dharmaśāstra) व्यवहारप्रक्रिया (Legal Procedure of Dispute) पूर्वपक्षः (Plaint)उत्तरम् (Reply)आसेधः (Injunction) क्रिया (Evidence) फलम् (Judgment) व्यवहारभेदाः (Types of Legal Disputes) प्राड्विवाकः (Judge)

मानवजीवनपद्धतेः सुष्टु सम्पादनाय महर्षिभिः बहुधा धर्मोपदेशपराणि धर्मशास्त्राणि प्रणीतानि।तत्र अन्यतमं पूजनीयं याज्ञवल्क्यमहर्षिप्रणीतं याज्ञवल्क्यस्मृत्यपरपर्यायं धर्मशास्त्रं वर्तते।तत्रेयं स्मृतिः अध्यायत्रयेण विभक्ता।आचार-व्यवहार-प्रायचित्तभेदात्मक अध्याय इति यावत्।तत्र आचाराध्याये मनुष्यजातस्य सर्वस्यापि सामान्यविशेषरूपाभ्यां धर्माः प्रतिपादिताः।पुनश्च व्यवहाराध्याये राज्ञा कर्तव्यं व्यवहारदर्शनम्, व्यवहारभेदाः, व्यवहारे दण्डा इत्यादिः निरूपितः।प्रायश्चित्ताध्याये अशुभकर्मणां प्रायश्चित्तं निरूपितम्।तत्रेदानीं याज्ञवल्क्यस्मृत्युक्तदिशा व्यवहारप्रविधिप्रक्रियाविमर्श इति शीर्षकमवलम्ब्य व्यवहाराध्याये साधारणव्यवहारमातृकाप्रकरणे निरूपितान् कान्चन विषयान् अधिकृत्य शोधप्रबन्धे अस्मिन् अधो निर्दिष्टदिशा प्रतिपादयामि।

- व्यवहारस्वरूपं,पुनश्च कःव्यवहारं पश्येदिति।
- व्यवहारभेदाः।
- अभियोगप्रकाराः
- आसेधव्यवस्था च।
- अर्थिनः पूर्वपक्षस्वरूपम् ,पूर्वपक्षाभासाश्च।
- प्रत्यर्थिन उत्तरस्वरूपम्,उत्तराभासाश्च।
- क्रियानिरूपणम्,फलम् च।

**<u>व्यवहारस्वरूपं,पुनश्च कःव्यवहारं पश्येदिति।</u>**

अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः । तच्च दुष्टनिग्रहमन्तरेण न संभवति। दुष्टपरिज्ञानं च न व्यवहारदर्शनमन्तरेण संभवति । तद्व्यवहारदर्शनम् अहरहः कर्तव्यमित्युक्तम् । **व्यवहारान् स्वयं पश्येत् सभ्यैः परिवृतोऽन्वहमिति** ।तथा च स्वराज्ये दुष्टानां निग्रहाय राज्ञा स्वयमेव व्यवहाराः द्रष्टव्या इति यावत्। अन्यविरोधेन स्वात्मसंबन्धितया कथनं व्यवहारः

। यथा कश्चिदिदं क्षेत्रादि मदीयमिति कथयति । अन्योऽपि तद्विरोधेन मदीयमिति ।तथा च विरुद्धकोटिद्वयोपेतवचनमित्यर्थः। निरुक्तव्यवहारदर्शनं पूर्वोक्तदिशा राज्ञः कर्म। तदुक्तं याज्ञवल्क्यस्मृतौ - **व्यवहारान् नृपः पश्येत् विद्वद्भिः ब्राह्मणैः सह ।**

**धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ॥**

वेदव्याकरणादिधर्मशास्त्राभिज्ञैः **विद्वद्भिः** ब्राह्मणैः । ब्राह्मणैः सहेति तृतीयानिर्देशात् तेषाम् अप्राधान्यम् । सहयुक्तेऽप्रधाने इति व्याकरणस्मरणात्। अतः व्यवहारस्य अदर्शने अन्यथादर्शने च राज्ञो दोषः, यथाह

**अदण्ड्यान्दण्डयत्राजा दण्ड्यांश्चैवाप्यदण्डयन्।**

**अयशो महदाप्नोति नरकं चैव गच्छति।।**इति । मनुः (८।१२८) ।

**क्रोधलोभविवर्जित** इति। धर्मशास्त्रानुसारेणेति सिद्धे क्रोधलोभविवर्जित इति वचनमादरार्थम् । **क्रोधः** अमर्षः,**लोभः** लिप्सातिशयः।तथा च एतद्विरहितस्सन् राजा व्यवहारान् पश्येदिति भावः। धर्मशानुसारेणैव व्यवहारदर्शनं द्रष्टव्यम्, नार्थशास्त्रनुसारेणेति भावः।

**<u>व्यवहारोदयः।</u>**

धर्मशास्त्र-आचार-विरुद्धेन मार्गेण परैः दुष्टैः कश्चित् जनः पीडितः चेत् सः राज्ञे प्राड्विवाकाय वा यद् आवेदयति विज्ञापयति स एव अभियोगः,भाषा,पूर्वपक्ष इत्युच्यते।तदावेद्यमानस्य विषयस्य प्रतिज्ञोत्तरसंशयहेतुपरामर्शप्रमाणनिर्णयप्रयोजनात्मको व्यवहारः सञ्जायते।भाषा-उत्तर-क्रिया-साध्यसिद्धि एतत्चतुष्टयान्यतमत्वं व्यवहारस्य लक्षणमित्युच्यते तदाह याज्ञवल्क्यस्मृतौ-

**स्मृत्याचारव्यपेतेन मार्गेणाऽऽधर्षितः परैः।**

**आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ।।**

**<u>अभियोगः</u>**

स चाभियोगः द्विविधः शङ्काभियोगःतत्त्वाभियोगश्चेति। यथाह नारदः –

**अभियोगस्तु विज्ञेयः शङ्कातत्त्वाभियोगतः ।**

**शङ्काऽसतां तु संसर्गात्तत्त्वं होढाभिदर्शनात् ।।** इति।

होढा लोप्त्रम्, लिङ्गमिति यावत्। तेन दर्शनं, साक्षाद्वा दर्शनं होढाभिदर्शनं तस्मादित्यर्थः। तत्त्वाभियोगोऽपि द्विविधः प्रतिषेधात्मको विध्यात्मकश्चेति। तत्राद्यः **मत्तो हिरण्यादिकं गृहीत्वा न प्रयच्छती**त्याकारकः 'अन्त्यश्च **क्षेत्रादिकं ममायमपहरति**' इति च। स चाभियोगः(व्यवहारः) पुनः अष्टादशधा भिद्यते। यथाह मनुः-

**तेषामाद्यमृणादानं निक्षेपो स्वामिविक्रयः।**

**संभूय च समुत्थानं दत्तास्यानपकर्म च।।**

**वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ।**

**क्रयविक्रयानुशयो विवादः स्वामिपालयोः ।।**

**सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके।।**

**स्तेयं च साहसं चैव स्त्रसिंग्रहणमेव च।**

**स्त्रीपुंधर्मो विभागश्च द्यूतामाह्वय एव च ।।**

**1.ऋणादानम् (Payment of Debts) 2.निक्षेपः( Deposits) 3.स्वामिविक्रयः (Sale without ownership) 4. संभूय च समुत्थानम् (Joint undertakings or Partnership)5.दत्तास्यानपकर्म (Resumption of gift ) 6.वेतनस्य आदानम् (Payment of wages) 7.संविदः व्यतिक्रमः (Violation of convention of guilds and Corporations) 8.क्रयविक्रयानुशयः (Sale and purchase) 9.स्वामिपालयोः विवादः (Dispute between master and servant) 10.सीमाविवादः (Boundary dispute )11.दण्डपारुष्यम् (Assault )12.वाचिकपारुष्यम् (Defamation)13.स्तेयम् (Theft) 14.साहसम् (Offense by violence )15.स्त्रीसङ्ग्रहणम् (Adultery ) 16.स्त्रीपुंधर्मः( Duties of husband and wife ) 17.विभागः( Partition )18.द्यूतामाह्वयः (Betting and gambling) चेति।**

पुन एतेषां साध्यभेदेन पुनर्बहुत्वं याति। यथाह नारदः –

**एषामेव प्रभेदोऽन्यः शतमष्टोत्तरं भवेत्।**

**कियाभेदान्मनुष्याणां शतशाखो निगद्यते।।**' इति।।

**'आवेदयति चेद्राज्ञे'** इत्यनेन स्वयमेवागत्यावेदयति, न राजप्रेरितः तत्पुरुषप्रेरितो वेति दर्शयति मनुः-

**नोत्पादयेत् स्वयं कार्यं राजा वाप्यस्य पूरुषः।**
**न च प्रापितमन्येन ग्रसेतार्थं कथंचन ।।**इति

**'आवेदयति चेद्राज्ञे'** इत्यनेनैव राज्ञा पृष्टः विनीतवेष आवेदयेत्। आवेदितं च युक्तं चेन्मुद्रादिना प्रत्यर्थ्याह्वानं राज्ञा कुर्यात्। तदाह

**काले कार्यार्थिनं पृच्छेत् प्रणतं पुरतः स्थितम्।**
**किं कार्यं का च ते पीडा मा भैषीः ब्रूहि मानव ।।**
**केन कस्मिन्कदा कस्मात् पृच्छेदेवं सभागतम्।**
**एवं पष्ठः स यद्ब्रूयात्स सभ्यैर्ब्राह्मणैः सह।।**
**विमृश्य कार्यं न्याय्यं चेदाह्वानार्थमतः परम्।**
**मुद्रां वा निक्षिपेत्तस्मिन्पुरुषं वा समादिशेत् ।।**इति

<u>**व्यवहारकार्यस्य क्षुद्रत्वे गुरुत्वाभावे वा केषाञ्चन आह्वानं नापेक्षितमित्यस्य निरूपणम्**</u>

**अकल्यबालस्थविरविषमस्थक्रियाकुलान्।**
**कार्यातिपातिव्यसनिनृपकार्योत्सवाकुलान्।।**
**मत्तोन्मत्तप्रमत्तार्तान् भृत्यानाह्वानयेन्नृपः।**
**न हीनपक्षां युवतिं कुले जातां प्रसूतिकाम्।।**
**सर्ववर्णोत्तमां कन्यां ता ज्ञातिप्रभुकाः स्मृताः।।**

<u>**व्यवहारकार्यस्य गुरुत्वे आह्वानमावश्यकमित्यस्य निरूपणम्**</u>

**तदधीनकुटुम्बिन्यः स्वैरिण्यो गणिकाश्च याः।**
**निष्कुला याश्च पतितास्तासामाह्वनमिष्यते ।।**
**कालं देशं च विज्ञाय कार्याणां च बलाबले।**
**अकल्यादीनपि शनैर्यानैराह्वानयेन्नृपः ।।**
**ज्ञात्वाभियोगं येऽपि स्युर्वने प्रव्रजितादयः।**
**तानप्याह्वानयेद्राजा गुरुकार्येष्वकोपयन् ।।**

<u>**आसेधव्यवस्था**(Injunction or Stay)</u>

आसेधो नाम राजाज्ञयाऽवरोधः।य आसेधं प्राप्नोति सः आसिद्ध इत्युच्यते।य आसेधं दापयति अथवा प्रापयति स आसेद्धा इत्युच्यते।कस्य आसेधः भविष्यतीत्याह-

**वक्तव्येऽर्थे ह्यतिष्ठन्तमुत्क्रामन्तं च तद्वचः।**
**आसेधयेद्विवादार्थी यावदाह्वानदर्शनम् ।।**

अयञ्च आसेधः चतुर्विधः।आद्यःअस्मात् प्रदेशान्न गन्तव्यमिति स्थानासेधः, द्वितीयःआसन्ध्यं न गन्तव्यमिति कालासेधः, तृतीयस्तु देशान्तरं प्रति न गन्तव्यमिति प्रवासासेधः, तुरीयः एतत्कर्म न कर्तव्यमिति इति कर्मासेध इति। य आसिद्ध आसेधमुल्लङ्घयति यो वा आसेद्धा आसिद्धनिष्ठमासेधमन्यथा करोति सः विनेयः दण्डभाग्भवेत्, शिक्षणीय इति यावत् ।तदुक्तं-

**स्थानासेधः कालकृतः प्रवासात्कर्मणस्तथा ।**
**चतुर्विधः स्यादासेधो नाऽऽसिद्धस्तं विलङ्घयेत् ॥**
**आसेधकाल आसिद्ध आसेधं योऽतिवर्तते ।**
**स विनेयोऽन्यथा कुर्वन्नासेद्धा दण्डभाग्भवेत् ।।**

<u>**आसिद्धेन क्वचित्सन्दर्भे आसेधोल्लङ्घने शिक्षाभावनिरूपणम्**</u>

नदी-सन्तार-कान्तार-दुर्देशोपप्लवादिषु सत्सु , विवाहादौ उद्यते पुरुषे , यागादिकं कर्तुमिच्छुः तस्मिन् , आयुधजीविनि योद्धरि, इत्यादौ आसेधोल्लङ्घने अपि दोषाय न भवति।तदुक्तं-

**नदीसन्तारकान्तारदुर्देशोपप्लवादिषु ।**
**आसिद्धस्तं परासेधमुत्क्रामन्नापराध्नुयात् ॥**

**निवेष्टुकामो रोगार्तो यियक्षुर्व्यसने स्थितः।**
**अभियुक्तस्तथान्येन राजकार्योद्यतस्तथा।।**
**गवां प्रचारे गोपालाः सस्यावापे कृषीवलाः।**
**शिल्पिनश्चापि तत्कालमायुधीयाश्च विग्रहे ।।इति ।।**

**अर्थिनः पक्षस्वरूपम् (Plaint)**

एवं प्रत्यर्थिनि मुद्रालेख्यपुरुषाणामन्यतमेन आनीते राजा प्राड्विवाको वा किं कुर्यादित्याह

**प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना ।**
**समामासतदर्धाहर्नामजात्यादिचिह्नितम् ॥ इति**

अर्थ्यत इत्यर्थः साध्यः सोऽस्यास्तीत्यर्थी , तत्प्रतिपक्षः **प्रत्यर्थी**, तस्य, **पुरतो लेख्यं** अग्रतः लेखनीयमिति। यथा येन प्रकरेण पूर्वमावेदनकाले आवेदितं तथेति भावः। न च आवेदनकाले एवार्थिवचनस्य लिखितत्वात् पुनः लेखनमनथेकमिति वाच्यम्।आवेदनसमये कार्यमात्रं निवेदितम्।इदानीं प्रत्यर्थनोऽग्रतः समामासादिविशिष्टं लिख्यते इति विशेषः।तथा हि- संवत्सर-मास-पक्ष-तिथि-वार-दिन-अर्थि-प्रत्यर्थि-नाम-बय-जाति-आकार-द्रव्य-तत्संख्या-स्थान-आवसथ-क्षमालिङ्गादि-प्रयोजनवत्-अल्पाक्षरत्वप्रभूतार्थत्वादियुक्तम्-अध्याहारानपेक्षम्-असन्दिग्धाक्षरम्-सिषाधयिषितार्थसहितम्-गौणलाक्षणिक पदरहितम्-पूर्वविदितार्थाविरोधि-लोकप्रसिद्धवस्तुविषयम्-पुरराष्ट्राविरुद्धं पूर्वापराविरुद्धमिति वा-अर्थान्तरसंशयरहितम् -साधनार्हम्-अनतिविस्तृतं-अनवशेषितं-देशकालाविरुद्धञ्च सत् लेखनीयमिति।अयमेव भाषा, प्रतिज्ञा,पक्षः,अभियोग इत्युच्यते।

**पक्षाभासाः**

इदानीं पक्षापरपर्यायाभियोगः कथं न भवेदिति सोदाहरणं निरूप्यते।तदुक्तं-

**अप्रसिद्धं निराबाधं निरर्थं निष्प्रयोजनम् ।**
**असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत्।**

अप्रसिद्धं -मदीयं शशविषाणं गृहीत्वा न प्रयच्छतीत्यादि। निराबाधम् -अस्मद्गृहदीपप्रकाशेनायं स्वगृहे यवहरतीत्यादि। निरर्थम् -अभिधेयरहितं कचटतपजडदगवेत्यादि। निष्प्रयोजनं -यथाऽयं देवदत्तोऽस्मद्गृहसन्निधौ सुस्वरमधीत इत्यादि। असाध्यं - यथाऽहं देवदत्तेन सभ्रूभङ्गमुपहसित इत्यादि।एतत्साधनासंभवादसध्यम् , अल्पकार्लत्वान्न साक्षिसंभवः, अल्पत्वान्न दिव्यमिति यावत्।विरुद्धं – यथा अहं मूकेन शप्त इत्यादिः पुरराष्ट्रादिविरुद्धमिति वा ।एवंभूताः सर्वे व्यवहाराः राज्ञा अनादेयाः इति भावः।

**प्रत्यर्थिन उत्तरस्वरूपम् (Reply)**

एवं शोधितपत्रारुढे पूवपक्षे किं कर्तव्यमित्याह-

**श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसन्निधौ ।**
**ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम् ॥७॥**

**श्रुतार्थः** श्रुतः भाषा अर्थः येन प्रत्यर्थिना असौ इति। तस्य श्रुतार्थस्य।**उत्तरं** पूर्वपक्षादुत्तरत्र भवतीति उत्तरम्।**पूर्वावेदकस्य** अर्थिनः **संनिधौ** समीपे। उत्तरं च अर्थिनः पक्षस्य निराकरणम्। **लेख्यं** लेखनीयम् ।एवमुत्तरे पत्रे निवेशिते साध्यसिद्धेः साधनप्रयोज्यत्वात् साधननिर्देशं कः कुर्यादित्यपेक्षित आह-**ततोऽर्थीति**।**तत** उत्तरानन्तरम्। अर्थी साध्यवान् सद्य एव अनन्तरमेव लेखयेत् । प्रतिज्ञातार्थः प्रतिज्ञातः साध्यः स च असावर्थश्चेति प्रतिज्ञातार्थः। तस्य प्रतिज्ञातार्थस्य ।साधनं साध्यतेऽनेनेति ।साधनं प्रमाणम् । उत्तरप्राप्त्यनन्तरं यस्य साध्यमस्ति स अर्थी प्रतिज्ञातार्थस्य साधनं साक्ष्यादिरुपं लेखयेदिति यावत्।

उत्तरलक्षणञ्च पक्षनिराकरणसमर्थं वचनम्।यथा- रूपकशतं मह्यं धारयतीत्युक्ते तन्निरकरणप्रतिपादकः नेत्याकारकः शब्द उत्तरमिति उच्यते। संप्रतिपत्ति-मिथ्या-प्रत्यवस्कन्दन-प्राङ्न्यायभेदात् उत्तरम् चतुर्विधम् । तदुक्तम् कात्यायनस्मृतौ-

**सत्यं मिथ्योत्तरं चैव प्रत्यवस्कन्दनं तथा ।**
**पूर्वन्यायविधिश्चैवमुत्तरं स्याच्चतुर्विधमिति ।**

**संप्रतिपत्तिः**

संप्रतिपत्तिः नाम सत्यापरपर्यायवचनं ओम् इति उत्तरम्। न च पक्षनिराकरणसमर्थवचनस्योत्तरत्वे सम्प्रतिपत्तेः कथमुत्तरत्वमिति वाच्यम्।

तत्र सत्योत्तरं यथा- **रूपकशतं मह्यं धारयतीत्युक्ते सत्यं धारयामीति** ।

**मिथ्योत्तरम्**

चतुर्विधं- यथा **रूपकशतं मह्यं धारयतीत्युक्ते**

- **मिथ्या एतत्।**
- **एतन्नाभिजानामि ।**
- **तदा तत्र न संनिधिः ।**
- **अजातश्चास्मि तत्काल इति** ।

**प्रत्यवस्कन्दनम्**

प्रत्यवस्कन्दनम् नाम **रूपकशतं मह्यं धारयतीत्युक्ते** सत्यं गृहीतं, प्रतिदत्तं प्रतिग्रहेण लब्धमिति वा।

**प्राङ्न्यायोत्तरम्**

प्राङ्न्यायोत्तरं तु **रूपकशतं मह्यं धारयतीत्यभियोगे** यत्राभियुक्त एवं ब्रूयादस्मिन्नर्थे अनेनाहमभियुक्तस्तत्र चायं व्यवहारमार्गेण पराजित इति ।

**उत्तरत्वव्याप्यानि**

- पक्षस्य व्यापकं निराकरणसमर्थम् ।
- सारं - न्याय्यं न्यायादनपेतम् ।
- असंदिग्धं - सन्देहरहितम्।
- अनाकुलं - पूर्वापराविरुद्धम्।
- अव्याख्यागम्यं - अप्रसिद्धपदप्रयोगेण दुःश्लिष्टविभक्तिसमासाध्याहाराभिधानेन वा अन्यदेशभाषाभिधानेन वा यत् व्याख्येयार्थ न भवेत्। तदुक्तम् कात्यायनस्मृतौ-

**पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् ।**
**अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुः।। इति**

**उत्तराभासाः**

उत्तरलक्षणरहितानामुत्तरवदवभासमानाः उत्तराभासाः निरूप्यन्ते ।

- संदिग्धं - सुवर्णशतमनेन गृहीतमित्युक्ते, सत्यं गृहीतं सुवर्णशतं माषशतं वेति।
- प्रकृतादन्यत्- यथा सुवर्णशताभियोगे पणशतं धारयामीति।
- अत्यल्पं - सुवर्णर्शताभियोगे पञ्च धारयामीति;
- अतिभूरि- सुवर्णशताभियोगे द्विशतं धारयामीति।
- पक्षैकदेशव्यापि - हिरण्यवस्त्राद्याभियोगे हिरण्यं गृहीतं नान्यादति।
- व्यस्तपदं- ऋणादानाभियोगे पदान्तरेणोत्तरं, यथा- सुवर्णशताभियोगे अनेनाहं ताडित इति।
- अव्यापि - देशस्थानादिविशेषणाव्यापि यथा मध्यदेशे वाराणस्यां पूर्वस्यां दिशि क्षेत्रमनेनापहृतमिति पूर्वपक्षे लिखिते क्षेत्रमपहृतमिति।
- निगूढार्थम्- यथा सुवर्णशताभियोगे किमहमेवास्मै धारयामीति,अत्र ध्वनिना प्राडिवाकः सभ्यो वा अर्थी वा अन्यस्मै धारयतीति सूचयतीति निगूढार्थम्।
- आकुलं- पूर्वापरविरुद्धम्, यथा- सुवर्णशताभियोगे कृते, सत्यं गृहीतं न धारयामीति।
- व्याख्यागम्यं- दुःश्लिष्टविभक्तिसमासाध्याहाराभिधानेन व्याख्यागम्यम् अदेशभाषाभिधानेन वा, यथा- सुवर्णशतविषये पितृऋणाभियोगे, ' गृहीतशतवचनात् सुवर्णानां पितुर्न जानामि इति, अंत्र गृहीतशतस्य पितुर्वचनात् सुवर्णानां शतं गृहीतमिति न जानामीति।
- असारं -न्यायविरुद्धम्, यथा-सुवर्णशतमनेन वृद्धया गृहीतं वृद्धिरेव दत्ता न मूलमित्यभियोगे 'सत्यं वृद्धिर्दत्ता न मूलं गृहीतम्' इति ।तदुक्तम् कात्यायनस्मृतौ-

**संदिग्धमन्यत्प्रकृतादत्यल्पमतिभूरि च ।**
**पक्षैकदेशब्याप्यन्यत्तथा नैवोत्तरं भवेत् ॥**
**यद्वयस्तपदमव्यापि निगूढार्थ तथाकुलम् ।**
**व्याख्यागम्यमसारं च नोत्तरं स्वार्थसिद्धये ।।" इति ।**

**क्रियानिरूपणम् (Proof with Evidence)& फलम् (Judgement)**

**क्रिया नाम स्वस्वोद्दिष्टार्थसाधकप्रमाणप्रदर्शनात्मिका भवति।**

- **रूपकशतं मह्यं धारयतीत्युक्ते** सत्यापरपर्यायवचने ओम् इति **सम्प्रतिपत्त्युत्तरे** प्राप्ते कस्यापि क्रिया न भवति।
- **रूपकशतं मह्यं धारयतीत्युक्ते** मिथ्या एतत्।।एतन्नाभिजानामि ।तदा तत्र न संनिधिः ।अजातश्चास्मि तत्काल इति। एवंविध**मिथ्योत्तराणां प्रा**प्तौ पूर्ववादिना एव क्रिया सम्पादनीया।
- **रूपकशतं मह्यं धारयतीत्युक्ते** सत्यं गृहीतं प्रतिदत्तञ्चेति, प्रतिग्रहेण लब्धमिति वा।**प्रत्यवस्कन्दनोत्तरे** प्राप्ते उत्तरवादिना एव क्रिया सम्पादनीया।**प्रत्यवस्कन्दनोत्तरे** कारणोत्तरे तु साक्षिलेख्यादिभिः निरूपणीयम्।
- **रूपकशतं मह्यं धारयतीत्यभियोगे** यत्राभियुक्त एवं ब्रूयादस्मिन्नर्थे **अनेनाहमभियुक्तस्तत्र चायं व्यवहारमार्गेण पराजित** इत्येवं **प्राङ्न्यायोत्तरे**प्राप्ते उत्तरवादिना एव क्रिया सम्पादनीया।अत्र प्राङ्न्याये जयपत्रेण वा प्राङ्न्यायदर्शिभिर्वा निरूपणीयम्।

**फलम्**

यदि सप्रमाणं क्रिया येन निरूप्यते सः जयमाप्नोति।येन न निरूपिता सः पराजयं प्राप्नोतीति वर्णयति याज्ञवल्क्यः-

**तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा ।**
**चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शितः**

तत्सिद्धौ तस्य सिद्धौ ।तस्य साधनस्य प्रमाणस्य वक्ष्यमाणस्य लिखितसाक्ष्यादि- लक्षणस्य, सिद्धौ निर्वृत्तौ, सिद्धिं साध्यस्य जयलक्षणां प्राप्नोति । अत अस्मात् प्रकारात् ,अन्यथा प्रकारान्तरे, साधनासिद्धौ विपरीतं साध्यस्यासिद्धिं पराजयलक्षणाम् आप्नोतीत्यर्थः।विवादेषु ऋणादानादिषु , तत्र प्रत्यर्थिनोऽग्रतः लेख्यं इति भाषापादः प्रथमः। श्रुतार्थस्योत्तरं लेख्यमित्युत्तरपादः द्वितीयः । ततोऽर्थी लेखयेत्सद्य इति क्रियापादस्तृतीयः।तत्सिद्धौ सिद्धिमाप्नोतीति साध्यसिद्धिपादः चतुर्थः चतुष्पात् चतुरंशकल्पनया व्यवहारान्नृपः पश्येदित्युक्तः सोऽयम् व्यवहारः उपदर्शित इत्थं वर्णितः।

**निष्कृष्टचिन्तनप्रयोजनम्**

लेखोऽयं याज्ञवल्क्यस्मृत्यां तद्व्याख्यानभूतायां मिताक्षरायां च वर्णितं व्यवहारप्रकरणं प्राचीनभारतीयविधिन्यायशास्त्रस्य एकं सुबद्धं रूपं प्रतिपादयति। तत्र व्यवहारस्य स्वरूपम्, अभियोग-उत्तररचना-क्रिया-आसेधविधानं, क्रियाविवेचनं यथासम्भवं स्पष्टतया निरूपितम्।एषा विधिव्यवहारसामान्यपद्धतिः केवलं धार्मिकदृष्ट्या न, अपि तु न्यायीयतया अपि अतीव महत्वपूर्णा अस्ति। याज्ञवल्क्यमहर्षिः 2500 वर्षेभ्यः प्रागेव अस्माकं समाजाय भाषा–उत्तर–क्रिया–फल इत्येतस्य चतुष्पादव्यवस्थायाः द्वारा तर्कयुक्तं, न्यायसमर्पितं च विधिदर्शनं सम ापादयत्।अतः याज्ञवल्क्यस्मृतौ प्रतिपादितं व्यवहारविधानं न केवलं तदानीन्तन समाजाय उपयुक्तम्, अपितु आधुनिकविधिशास्त्रस्य ापि एकं मूल्यमूलकं आधाररूपं प्रदर्शकं च निश्चप्रचं भवितुमर्हति।